© 2015 IJSRST | Volume 1 | Issue 5 | Print ISSN : 2395-6011 | Online ISSN : 2395-602X
International Journal of Scientific Research in Science and Technology

# मानवजीवने ज्योतिषस्य उपादेयता



**डॉ. रामदासशर्मा**

सहायकाचार्यः, तिषविभागः,
राष्ट्रियसंस्कृतसंस्थानम् (मानितविश्वविद्यालयः)
श्रीरणवीरपरिसरः , कोट-भलवालः, जम्मूः

**भूमिका** – धर्म-अर्थ-कामसाधकमिदं शास्त्रं नूनं लोके महत्त्वपूर्णस्ति – धर्मार्थकामाः सममेव सेव्या । यो ह्येकभक्तः स नरो जघन्यः । इति। धर्मानुरोधेनार्थस्य, अर्थस्यानुरोधेन कामस्य, कामानुरोधेन मोक्षस्य प्राप्तीति सर्वेषामुपयोगः एवास्य परमः सन्देशः। इदं शास्त्रं तु लोकोपकारकमस्त्येवास्यदर्शनमपि पापनाशकं भवति । यथा –

**दशदिनकृतं पापं हन्ति सिद्धान्तवेत्ता**
**त्रिदिवजनितदोषं तन्त्रविज्ञः स एव ।**
**करणभगणवेत्ता हन्त्यहोरात्रदोषं**
**जनयति च ह्यधमास्तत्रनक्षत्रसूचीः ।।**

लगधाचार्यस्य महर्षिवशिष्ठस्य च कथनमस्ति यत् ज्योतिषशास्त्रं कालनिर्धारकं शास्त्रमस्ति । अपि च महर्षि पाराशरः अस्य मुख्यं प्रयोजनमायुष्यं लोकयात्रां च मनुते । पाराशरहोराशास्त्रे मैत्रेयः पाराशरमुनिं ज्योतिषस्य प्रयोजनं विज्ञापयन् अवोचत् –

**आयुश्च लोकयात्रा च द्रेशास्त्रेऽस्मिन् प्रयोजनम् ।**
**निश्चेतुं को नु शक्नोति वसिष्ठो वा बृहस्पतिः ।।**
**किं पुनर्मनुजास्तत्र विशेषस्तु कलौ युगे ।।**

**मुख्यशब्द**– मानवः, जीवनः, ज्योतिषः, महत्त्वम्, धर्मः,कामः,अर्थः।

वराहमिहिरस्य कथनमस्ति यत् पूर्वजन्मनि प्राणिभिः यद् शुभाशुभं कर्म कृतमस्ति , तदिदं शास्त्रं तथैव व्यनक्तिः यथा अन्धकारे अदृश्यपदार्थान् दीपकः । बृहज्जातकस्य टीकाकारस्य भट्टोत्पलस्यानुसारेण कानिचित् कर्माणि दृढमूलकानि भवन्ति कानिचिच्च शिथिलमूलकानि भवन्ति। दृढमूलककर्माणां फलं निश्चयेन भोक्तव्यं भवति, पुनश्च शिथिलमूलकर्मणां फलं ज्यौतिषशास्त्रेण ज्ञात्वा दान-जप-तपहवनादिभिः निवारयितुं शक्यते। यथा श्लोकः –

**यदुपचितमन्यजन्मनि शुभाशुभं तस्य कर्मणः पंक्तिम् ।**

**व्यञ्जयति शास्त्रमेतत् तमसि द्रव्याणि दीप इव ।।**

किञ्च मानवानां समस्तक्रियाकलापाः ज्योतिषस्यानुसारेणैव भवन्ति । तिथि-वार-सप्ताह-पक्ष-मास-अयन-ऋतु-वर्ष-उत्सवादीनां अनेनैव शास्त्रेण परिज्ञानं जायते । एवं पंचस्कन्धेषु सिद्धान्तग्रन्थेषु ग्रहाणां गतिः,स्थिति दिशा, इत्यादिनां च निर्णयः चतुर्युगादीनां निर्णयः प्रमाणं च अयनांश पातादीनां वर्णनं , क्रान्तिशरादीनां विषयाणां परिज्ञानं त्रुटयादितः प्रलयकाल यावत् गणना, द्विविधगणितं , विविधवेधयन्त्राणां वर्णनं समुपलभ्यन्ते । होरा स्कन्धस्य उत्पतिः अहोरात्र शब्दात् अभूत् । अस्य द्वितीयं नाम जातकशास्त्रमपि विद्यते । बृहज्जातके वराहमिहिरेण उक्तम् – **होरेत्य होरात्रविकल्मपमेके वांछन्ति पूर्वापर वर्णलोपात्** । तथा अन्यच्च-

**विधात्रा लिखिता मासौ ललाटे अक्षर मालिका ।**

**दैवज्ञस्ताम् पठेत् व्यक्तं होरा निर्मलचक्षुषा ।।**

एवं जन्म कालिक जातकस्य ग्रहनक्षस्य तारादीनां ग्रहाणां परिस्थित्यानुसारेणैव मानवस्य सुःखदुःखयोः शुभाशुभयोः निरूपणमस्मिन्स्कन्धे कृतमस्ति । मानव जीवनस्य इष्टानिष्टयोः उन्नत्यवनत्योः , लाभालाभयोः , जयपराजयोः, भाग्यचिन्तनादि शुभाशुभविषयाणां वर्णनमपि अस्मिन् शास्त्रेः क्रियते । एवमेव संहिताग्रन्थेषु दिक्शोधनं , शल्योद्धारः, मेलापकविषयः , आयाद्ययनं गृहोपकरण, इष्टिका द्वारादीनां स्थापनं , गृहारम्भ, गृहप्रवेशयोः निर्णयः, देवस्थलादीनां स्थापनम् इत्येतेषां प्रमुखविषयाणां विषये अस्मिन् शास्त्रे प्रतिपादितं वर्तते ।

किञ्च मानवानां समस्तक्रियाकलापाः ज्योतिषशास्त्रानुसारेणैव भवन्ति । शिक्षितस्य, सभ्य समाजस्य तु वार्तेव का । भारतीया अपठितकृषका अपि व्यवहारोयोगो ज्योतिषज्ञानेन परिचिताः सन्ति ते सम्यग् जानन्ति यत्  अस्मिन् मासे अस्मिन् पक्षे अस्मिन् नक्षत्रे वर्षा वर्षति । अतः बीजारोपणं कदा कर्त्तव्यं येन सस्यम् अत्यधिकं भवेत् ।

केचन महानुभावा इदं तर्कमुपस्थापयन्ति यत्  अद्यतनीये वैज्ञानिके युगे कृषिशास्त्रस्य मर्मज्ञाः अकाले एव आवश्यकतानुसारं वर्षायाः आयोजनं निवारणं वा कृत्वा कृषिकर्म सम्पादयन्ति , अस्यां दशायां कृषीकानां कृते ज्योतिषज्ञानस्य आवश्यकता न वर्तते ।

चन्द्रः यस्मिन् काले जलचरराशो जलचरनक्षत्रेषु वा चरति , तस्मिन्नैव काले वर्षा भवति । प्राचीन ज्योतिषस्य अन्यतमोङ्गे संहितायाम् एतादृश्यः चर्चाः समुपलभ्यन्ते । अतः एत्तु समीचीनमनुभूयते यत् ज्योतिषस्य सर्वान् तत्त्वान् विज्ञायेव कृषिकर्म सम्यक्तया सम्पन्नं भविष्यति ।

किञ्च जलपोतानां , वायुयानानां चालकदलान् ज्योतिषस्य आवश्यकता नित्यैव भवति , यतः ते ज्योतिषमहार्णवे जलपोतस्थितिं जानन्ति । घटिकायामाभावे सूर्य-चन्द्र इत्यादि नक्षत्रपिण्डान् अवलोक्य कालावबोधं  जायते । भुगोलस्य अध्ययनं तु तस्य शास्त्रं विना किचिंदपि कर्तुं न पारयामः । अन्वेषणकार्यं सुसम्पन्नार्थमपि ज्योतिषज्ञानं अवश्यम्भावो दृश्यते । गिरेः उच्चं, नद्याः गाम्भीर्यज्ञानं ज्योतिषशास्त्रेणैव क्रियते । यदि ज्योतिषशास्त्रं न भवति तदा वेदानां प्राचीनता कदापिन सिद्ध्यति । सूर्य-चन्द्राणां ग्रहाणानाम् आधारोपरि प्राचीनैतिहासकाः तिथयः क्रमबद्धाः कर्तुं शक्यन्ते । सृष्टेः रहस्यं ज्योतिषेनैवावगम्यते । प्राचीनकालादेव भारतवर्षे सृष्टेः रहस्यम् अन्वेषणार्थं ज्योतिषस्य उपयोगं वीहितम् । अनेनैव कारणेन सिद्धान्तज्योतिषस्य ग्रन्थेषु सृष्टेः विवेचनम् अवश्यं दृग्गोचरो भवति ।

ज्योतिषं विना औषधीनां निर्माणं यथाकाले कर्तुं न शक्यते । ये भिषकाः शास्त्रस्य अस्य ज्ञानात् अपरिचिताः सन्ति ते सुन्दराणि अपूर्वगुणकारिणः औषधीनां निर्माणं कर्तुं न शक्नुवन्ति ।

किं बहुना साधारण जनाः अपि अस्य शास्त्रस्य ज्ञानेन रोग रहितः जायन्ते । यतः अधिकांशतः रोगाः सूर्येण, चन्द्रमसा वा विशेषप्रभावेण उत्पद्यन्ते । ज्योतिषविदानाम्

अनुमानमिदं यतः येन प्रकारेण चन्द्रमा समृद्धं जलम् आलोडयति आन्दोलयति वा तेनैव प्रकारेण शरीरस्य रूधिर प्रवाहे अपि स्वप्रभावेण निर्बलमानवानां रोगयुक्तान् कुरुते ।

अस्य शास्त्रस्य महती उपयोगिता इयं वर्तते यत् इदं शास्त्रं समस्त मानवजीवनस्य प्रत्यक्षपरोक्षरहस्यान् विवेचयति प्रतीकैश्च समस्त जीवनं प्रत्यक्षे रूपे तेनैव प्रकारेण प्रकटयति येन प्रकारेण दीपः अन्धकारे स्थितं वस्तुं दर्शयति । मानवस्य सर्वमपि व्यावहारिककार्यम् अस्य शास्त्रस्य ज्ञानं विना अग्रे न आयाति ।

सर्वतो भावेन ज्योतिषशास्त्रस्यैवोपयोगिता अस्माकं जीवने सर्वेषु क्षेत्रेषु दरीदृश्यते । एवम् अस्माभिवक्तुं शक्यते यत् भारतीयज्योतिषं पूर्णतया मानवजीवनोपयोगी शास्त्रं सिद्धं भवति । उक्तं च केनचित् कविना –

**विफलान्य शास्त्राणि विवादस्तेषु केवलम् ।**

**सफलं ज्योतिषं शास्त्रं चन्द्रार्कौ यत्र साक्षिणौ ।।**

ज्योतिर्विवरणग्रन्थेऽपि कथितमस्ति यत् ज्योतिषशास्त्रं पुण्यप्रदं स्वतः प्रामाण्यं च शास्त्रमस्ति, प्रत्यक्षता एवास्याहारोऽस्ति

**ज्योतिःशास्त्रमिदं पुण्यं प्राहुर्नयविदो बुधाः।**

**स्वतः प्रामाण्यमस्यास्ति सत्यं प्रत्यक्षतो यतः ।।**

सांसारिकव्यवहारे मासः, वर्षः,वारः, तिथिः नक्षत्रादीनां प्रयोजनं सर्वविदितमेवास्ति –एतानि सर्वाणि ज्ञानानि ज्योतिषाधीनौ सन्ति। अन्यत्रोक्तममस्ति यत् –

ज्योतिषशास्त्राध्ययनेन सत्यविषये ज्ञानं दृढं भवति । दिक्-देश-कालसूचकमिदं शास्त्रं व्रत-यज्ञ-तप-दोनोपवासादीनां न नननन नमूलमस्ति। अतएव सम्पूर्णवेदवेदाङ्गानि ब्राह्मणम्, आरण्यकम्, उपनिषद्, धर्मशास्त्रम्, स्मृतयः इतिहासपुराणादीनामपि अयमेव निष्कर्षः यत् इयमुपासना यदि सुन्दरे शुभे समये क्रियेत चेत् पूर्णतया सफला भवति। यदि चेत् शुभे समये क्रियेत चेत् तादृशी सफलता नैव प्राप्यते ।

अनेन प्रकारेण कालविधानशास्त्रेषु ज्योतिषस्य मानवजीवने महत्त्वं कथं वर्तते इति उपर्युक्तरित्या सम्यकतया प्रमाणपुरस्सरं प्रतिपादितं वर्तते । अस्य शास्त्रस्य महत्त्वं मानवजीवने आसीत्, अस्ति भविष्यति इति निश्चितम् ।

**सन्दर्भग्रन्थसूची** –


1. मूहूर्तमार्तण्डः : दैवज्ञनारायण विरचितौ , चौखम्बा विद्याभवन वाराणसी ।
2. होरारत्नम् : श्री मन्मिश्र बलभद्रमिश्र विरचितं , मोती लाल, बनारसीदास, दिल्ली ।
3. बृहज्जातकम् : दैवज्ञवराहमिहिर विरचितः , ठाकुरप्रसाद एण्ड सन्स राजाघरवाला, वाराणसी ।
4. नारद संहिता : महर्षि नारद विरचितम्, मोती लाल, बनारसीदास, दिल्ली ।
5. भारतीय ज्योतिषम् : श्रीबालकृष्णदीक्षित कृत , चौखम्बा विद्याभवन वाराणसी ।
6. सूर्यसिद्धान्तः कपिलेश्वर शास्त्री, चौखम्भा संस्कृतसंस्थान वाराणसी ।
7. मुहूर्तचिन्तामणि श्रीरामदैवज्ञविरचितं, चौखम्बा विद्याभवन वाराणसी ।